# Adhyatma Tirthatanam

# અધ્યાત્મતીર્થાટનમ્

## Document Information

Text title : Adhyatma Tirthatanam

File name : adhyAtmatIrthATanam.itx

Category : misc, vAsudevanElayath

Location : doc_z_misc_general

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# Adhyatma Tirthatanam

# અધ્યાત્મતીર્થાટનમ્

ધર્મક્ષેત્રમુપાગતોઽદ્ય ભગવાન્ શ્રીસત્યસાયીશ્વરઃ
કિઞ્ચાત્રૈવ દિનદ્વયં નિવસતિ પ્રાજ્યાનુકમ્પાર્દ્રધીઃ ।
કલ્યાણેઽવતરન્નિમામશ◌ૃણવં વાર્તાં પ્રહર્ષાદ્ભુતો-
ત્કણ્ઠાસઙ્કુલમાનસઃ પુનરગાં વાસાય પુત્રાલયમ્ ॥ ૧॥

સાયાહ્ને દુહિતુર્ગૃહં ગતવતા છેદાનગર્યાં મુદા,
શ્વોભાવ્યુત્કટપુણ્યલભ્યભગવત્સન્દર્શનાકાઙ્ક્ષિણા ।
સ્મારં સ્મારમુદારસાયિચરિતં ભક્તાર્તિવિધ્વંસનં
હર્ષોન્માદમુપેયુષા ચ ગમિતા રાત્રિઃ કથઞ્ચિન્મયા ॥ ૨॥

પ્રત્યૂષે ગુરુવાયુમન્દિરપતિં છેદાનગર્યાં નવે
ક્ષેત્રે ભાન્તમમન્દદિવ્યકરુણાનિષ્યન્દમન્દસ્મિતમ્ ।
શાસ્તારં શરણં સમસ્તજગતાં દુર્ગાઞ્ચ વિઘ્નેશ્વરં
સ્કન્દં ચાપ્યુપનમ્ય સમ્યગભવં શાન્તપ્રસન્નાન્તરઃ ॥ ૩॥

“અન્ધેરી” મગમં પ્રશાન્તસુભગે તસ્મિંશ્ચ સાયન્તને
જામાત્રા સુતયા તથા દયિતયા સાકં સદૌહિત્રકઃ ।
અદ્રાક્ષં સુચિરાદ્દિદૃક્ષિતમહં શ્રી સાયિકૃષ્ણસ્ય ત-
“દ્ધર્મક્ષેત્ર”મનલ્પશિલ્પસુભગં વિસ્તીર્ણપદ્માકૃતિઃ ॥ ૪॥

તત્રારક્તમનોજ્ઞકાન્તિવિકસન્માર્તણ્ડબિમ્બાનનાં
શાન્તાં શોણમનોહરામ્બરધરાં મુગ્ધપ્રકાશસ્મિતામ્ ।
પુણ્યક્ષેત્રમિદં સ્વકીયમહસા વિદ્યોતયન્તીં શિવાં
સન્ધ્યાં પર્તિમહેશમૂર્તિમપરાં સાનન્દદૃષ્ટ્યાઽપિબમ્ ॥ ૫॥

ધર્મક્ષેત્રમહાઙ્ગણં જનસહસ્રાકીર્ણમેકાન્તવ-
ન્નિશ્શબ્દં સ્ફુટભક્તિભાવવિમલં સંપ્રાવિશં સાદરમ્ ।
શ્રીસાયીશપદામ્બુજપ્રણિહિતસ્વાન્તઃ પ્રશાન્તાખિલ-
ક્લેશઃ સમ્યગુપાવિશઞ્ચ કુહચિત્ હર્ષોન્મિષચ્ચેતનઃ ॥ ૬॥

દૃષ્ટે તત્ર ચ મણ્ડપે વિનિહિતં સાયિશાસિંહાસનં
    શ્રદ્ધાભક્તિસમેતશિષ્યનિવહૈઃ સજ્જીકૃતં પાવનમ્ ।
યત્તાવત્ ભગવત્સમાગમમહાનન્દપ્રતીક્ષામૃતા-
    સ્વાદે મગ્નમિવ સ્થિતં સુવિમલં ભક્તાન્તરઙ્ગં યથા ॥ ૭॥

યાતાઃ કાલકલાઃ કથઞ્ચન સમુત્કણ્ઠાકુલાશ્ચાયતા-
    સ્તાવત્ ભક્તસહસ્રનેત્રનલિનૈરારાધિતે મણ્ડપે ।
જ્યોતિઃ કિઞ્ચન સાન્ધ્યકાન્તિસુભગં પ્રાદુર્બભૂવ ક્રમા-
    ત્તન્મધ્યે સ્ફુટમાબભૌ ચ ભગવદ્રૂપં જગન્મઙ્ગલમ્ ॥ ૮॥

ભાવગ્રાહિ વિશુદ્ધમુગ્ધકરુણાનિષ્યન્દિ નેત્રાઞ્ચલં
    પ્રેમાર્દ્રાદ્ભુતભવ્યશાન્તિમધુરસ્મેરં તદાસ્યામ્બુજમ્ ।
તદ્દિવ્યાભયહસ્તમદ્ભુતમહાભૂતિપ્રદં તાદૃશં
    રૂપં સાયિહરેઃ મદીયહૃદયે ભક્ત્યા દૃઢં મુદ્રિતમ્ ॥ ૯॥

અદ્ધા મણ્ડપતોઽવરુહ્ય ભગવાન્ ભક્તાવલીમધ્યગઃ
    સુસ્મેરાક્ષિકલાવલોકનમહાનન્દં પ્રસાદં દિશન્ ।
મન્દં તત્ર ચચાર પુણ્યનિમિષાન્ કાંશ્ચિત્ પ્રતીક્ષાકુલં
    ચક્ષુશ્ચાક્ષ માપપાત ભગવન્મૂર્તૌ સમેષાં નૃણામ્ ॥ ૧૦॥

મન્દં મન્દમુપાસસાદ ભઘવાંસ્તસ્થાવિવાલ્પં મમા-
    દૂરે; મય્યકિરત્ પ્રશાન્તમધુરસ્મેરાર્દ્રદૃષ્ટ્યામૃતમ્ ।
ભક્ત્યા મીલિતલોચનઃ નતશિરસ્યાબદ્ધમુગ્ધાઞ્જલિઃ
    પ્રાપં ચાસ્તસમસ્તદુઃખનિવહાં દિવ્યાનુભૂતિં નવામ્ ॥ ૧૧॥

અસ્માર્વં ચ પુરાપ્રશાન્તિનિલયે પત્ન્યાસમેતસ્ય મે
    લબ્ધં સાયિમિથોઽવલોકનમિદં સમ્ભાષણઞ્ચાવયોઃ ।
કિં તે વાઞ્છિત મિષ્યતે ભગવતિ પ્રેમૈવ, ભક્તોઽસિ, ત
    ન્માભૈષીર્વિપદ, સ્ત્વયા સહ સદા વર્તે હિ ભક્તપ્રિયઃ ॥ ૧૨॥

ચેતો ક્ષણમાતતાન નિપુણં સિંહાવલોકં સ્વયં
    સઙ્કીર્ણે મમ જીવિતાધ્વનિ દદર્શાન્વર્યતાં તદ્ગિરઃ ।
શ્રીસાયિશ્વરકૃષ્ણપાદનલિનદ્વન્દ્વેનનામાખિલં
    ભક્ત્યા ચાર્પયદાત્મનિર્વૃતિભવાપાનન્યલભ્યાં પરામ્ ॥ ૧૩॥

કિઞ્ચૈતત્ સ્મૃતિમણ્ડલે સ્ફુટતરં નિર્ભાતમાસીન્મમ

પ્રેયસ્યૈ સમદાત્તદાદ્ભુવમહાસિદ્ધિન્ધ વિભૂતિં સ્વયમ્ ।
ભસ્માલિપ્તકરાઙ્ગુલીમૃદુતમસ્પર્શેન ચક્રે નવં
પુણ્ડ્રં મે તનયસ્ય ચાપિ નિટિલે શ્રીસાયિનાથો હરિઃ ॥ ૧૪॥

ધર્મક્ષેત્ર ઇદં ગુરો! ભગવતા દત્તં પુનર્દ્રદર્શનં
ત્વન્માહાત્મ્યપદૃઢાવબોધકમહં મન્યેઽનુગીતાસમમ્ ।
અદ્યાપાસ્તસમસ્તશઙ્કમવગચ્છામિ પ્રભો, જીવિતે
લક્ષ્યં માર્ગમપિ ત્વયા નિગદિતં સત્યં શિવં સુન્દરમ્ ॥ ૧૫॥

કિન્તુ શ્રીભગવન્ બિભેમિ ચપલાન્મચ્ચેતસસ્ત્વત્કૃપા-
બદ્ધં નિશ્ચલમસ્ત્વિદં ચ વિમલે ત્વત્પાદપાથોરુહે ।
સંસારાર્ણવતારણે મમ ગુરુસ્ત્વં કર્ણધારઃ સ્વયં
નિર્ભીકં કુરુ માં દયસ્વ ભગવદ્દાસાનુદાસે મયિ ॥ ૧૬॥

ધર્મક્ષેત્રવિશુદ્ધધામ્નિ યદહો! લબ્ધં પરં દુર્લભં
સાયીશસ્ય જગદ્ગુરોર્ભગવતો યાદૃચ્છિકં દર્શનમ્ ।
તન્મન્યે મમ દૂરદેશગમનં કાર્યાન્તરાર્થં સ્વયં
સમ્પન્નં ભગવત્કૃપાલવબલાદધ્યાત્મતીર્થાટનમ્ ॥ ૧૭॥

ઇતિ શ્રીવાસુદેવન્ એલયથેન વિરચિતં અધ્યાત્મતીર્થાટનં સમ્પૂર્ણમ્ ।

*Adhyatma Tirthatanam*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*